"चन्दनागुरुकर्पूरकुङ्कुमोशीरपत्रकैः अनुलिप्तो नरैर्भक्त्या हरिरिष्टं प्रयच्छतीति" पुरा० ।

**अनुलेप** पु० अनु+लिप–भावे घञ् । चन्दनादिमर्द्दने । करणे घञ् । अनुलेपसाधाने चन्दनादौ ।

**अनुलेपक** त्रि० अनुलिम्पति अनु+लिप–ण्वुल् । चन्दनादिभिः स्वदेहदेवार्च्चाद्यनुलेपकारके । स्त्रियां टाप् । तस्याः धर्म्यं महिष्या० अण् । आनुलेपिकम् तद्धर्म्ये त्रि० ।

**अनुलेपन** न० अनु+लिप–भावे ल्युट् । चन्दनादिमर्दने "धात्रीफलं तथा दद्यादनुलेपनकारणादिति" पुरा० । करणे ल्युट् । अनुलेपसाधने चन्दनादौ द्रव्ये ।

**अनुलेपित** त्रि०अनु+लिप–णिच्–कर्मणि क्त । "अनुलिप्तीकृते

**अनुलेपिन्** त्रि० अनुलिम्पति अनु+लिप–णिनि । अनुलेपके

**अनुलोम** पु० यथाक्रमे अव्ययी० अच्समा० । यथाक्रमे । "अनुलोमविलोमाभ्यां मातृकार्णान् जपेद्बुध इति तन्त्र० "तत्र प्रतिलोममालिम्पेन्नानुलोममिति" सुश्रुतम् अनुगतः लोम आनुरूप्यम् रोम वा प्रा०स० । आनुरूप्यप्राप्ते, यथाक्रमप्राप्ते च त्रि० "सवर्णासु पुत्राः सवर्णा भवन्ति अनुलोमजा मातृवर्णाः" इति विष्णुस० अनुलोमं कृष्टं चेत्रं प्रतिलोलं कर्षति सि०कौ० । अनुगतरोमे च । "अनुलोमाः सुलोमाश्च रुचिरा रोमराजय" इति ।

**अनुलोमज** पु०स्त्री० अनुलोमेन यथाक्रमेण जातः जन–ड । परिणीतक्षत्रियादिस्त्रीषु विप्रादिभ्य उत्कृष्टेभ्यो वर्णेभ्यो जाते मूर्द्धावसिक्तादौ सङ्कीर्णवर्णे । अनुलोमजाश्च "विप्रान्मूर्द्धावसिक्तो हि क्षत्रियायां, विशःस्त्रियाम् । अम्बष्ठः, शूद्र्यां निषादजातिः पारशवोऽपि वा" "वैश्याशूद्र्योस्तु राजन्यात्, माहिष्योग्रौ सुतौ स्मृतौ, वैश्यात्तु करणः शूद्र्यां, विन्नास्वेष विधिः स्मृत" इति च याज्ञ०स० ।

**अनुलोमजन्मन्** पु०स्त्री० अनुलोमं पितृवर्णानुक्रमेण जन्म यस्य । अनुलोमजाते मूर्द्धावसिक्तादौ । स्त्रियां डाप् । "अन्येऽनुलोमजन्मानः प्रतिलोमभवा अपीति" काशी० ।

**अनुवंश** अव्य० वंशे विभक्त्यर्थे अव्ययी० । वंशे इत्यर्थे तत्र भवः परिमुखा० अञ् । आनुवंश्यस्तत्र भवे त्रि० ।

**अनुवक्तृ** त्रि० अनुवक्ति गुरुमुखात् श्रुत्वा तदनुरूपं वदति अनु+वच–तृच् । गुरुमुखोच्चारितानुरूपपाठके । स्त्रियां ङीप् ।

**अनुवक्र** त्रि० अनुक्रमेण वक्रः । अतिवक्रे "यस्य वक्रानुवक्राग्रहा" इति सुश्रुतम् अतिवक्रत्वञ्च ग्रहाणाम् "अतिवक्रा नगाष्टग" इति सूर्य्याक्रान्तराश्यपेक्षया सप्ताष्टमस्थानस्थितौ भवति ।

**अनुवचन** न० अनुरूपं वचनम् प्रा०स० । अनुरूपकथने "तमेतं ब्राह्मणाविविदिषन्ति वेदानुवचनेन" इति "विश्वक्षोर्वेदानुवचनमिति" च श्रुतिः ।

**अनुवत्सर** पु० अनुकूलो वत्सरो दानादिविशेषाय । "शकाङ्कात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः । सम्परीदानुपूर्व्वाश्च तथोदापूर्व्वका मता" इत्युक्ते वत्सरभेदे । "संवत्सरे तथा दानं तिलस्य तु महाफलम् । परिपूर्व्वे तथा दानं यवानाञ्च द्विजोत्तम ! । इदापूर्व्वे च वस्त्राणां धान्यानाञ्चानुपूर्व्वके उदासंवत्सरे दानं रजतस्य महाफलमिति" विष्णु०ध०पुरा० । अनुवर्षादयोऽप्यत्र ।

**अनुवर्त्तन** न०अनु+वृत–ल्युट् । अनुगमने, अनुसरणे, व्याकरणादौ पूर्व्वसूत्रस्थितशब्दस्योत्तरस्थलेऽन्वयार्थमनुसरणे च ।

**अनुवर्त्तिन्** त्रि०अनु+वृत–णिनि । पश्चाद्गामिनि अनुयायिनि च स्त्रियां ङीप् । "सशरीरा गता स्वर्गं भर्त्तारमनुवर्त्तिनी" इति रामा० ।

**अनुवाक** पु० अनूच्यते अनु+वच–घञ् कुत्वम् । गानसूक्ते ऋग्विशेषे, ऋग्यजुःसमूहे, प्रश्नानाम्ना ख्याते वेदांशे । "अग्निरेकादशैकोत्यनुवाकं द्वादशवत् क्रत्वेति" कात्या० १४,५,२६, "चतुःकण्डिकात्मकमनुवाकं द्वादशवदिति" वेददीपः । "अध्यायानुवाकयोर्लुक्" पा० विमुक्तशब्दोऽस्त्यस्य अण् तस्य वा लुक् । वैमुक्तो विमुक्तो वा अध्यायः अनुवाको वा ।

**अनुवाक्या** स्त्री अनु+वच–ण्यत् कुत्वम् । ऋत्विग्भेदः प्रशास्ता तत्पाठ्यायां देवताह्वानसाधने ऋचि । "पुरोऽनुवाक्या याज्या वेति" यजु० "द्वे ऋचौ सुराग्रहणार्थे याज्यानुवाक्ये प्रथमानुवाक्या, सुतमिवेति याज्येति" वेददीपः । "पुरोऽनुवाक्या याज्या च शस्यैवेति" छ०उप० । पुरोऽनुवाक्या प्राक्प्रयोगकालात् याः प्रयुज्यन्ते ऋचः सा ऋग्जातिः पुरोऽनुवाक्योच्यते इति भा० ।

**अनुवाच्** पु० अनुवाचयति अनु+वच–णिच्–क्विप् । अनुवाचके अध्यापके ।

**अनुवाचन** न०अनु+वच–णिच्–ल्युट् । अध्यापने । तत्प्रयोजनमस्य अनुप्रव० छ । अनुवाचनीयः अध्यापके त्रि० ।

**अनुवात** पु० अनुगतो वातः । शिष्यादिदेशात् गुर्वादिदेशगन्तरि वायौ "प्रतिवातेऽनुवाते च नासीत गुरुणा सहेति" मनुः ।

**अनुवाद** पु० अनु+वद–घञ् । विधिप्राप्तस्य वाक्यान्तरेण कथने यथा अग्निहोत्रं जुहोतीति वाक्येन प्राप्तस्य होमस्य